# सप्तमोऽध्यायः

## सौगतानां शब्दार्थचिन्ता

# सप्तमोऽध्यायः

## सौगतानां शब्दार्थचिन्ता

बौद्धनये तदेव परमार्थसद्वस्तुभूतं यदर्थक्रियायाम् अर्थात् प्रयोजननिष्पादने समर्थं भवति । तथा च प्रमाणवार्त्तिके समर्थितमेतत् कीर्त्तिना – 'तस्मात् प्रमेयाधिगतेः साधनं मेयरूपता' – इत्येवं वदता । अत्र धर्मकीर्तिकृतो न्यायविन्दुग्रन्थोऽस्माकं प्रमाणम् । **'अर्थक्रियासामर्थ्यलक्षणत्वाद् वस्तुनः'**[१] । बौद्धा हि सर्वं वस्तु क्षणिकमिति मन्यन्ते । उत्पत्तिक्षणात् परस्मिन्नेव क्षणे वस्तु विनाशमेति ।। पूर्वस्य वस्तुनो यो ध्वंसक्षणः स एव परस्य उत्पत्तिक्षणः । न हि बौद्धैरन्तर्वर्त्ती कोऽपि स्थितिक्षणः अङ्गीक्रियते । वस्तुनि क्षणिकानि एकमेव सन्तानम् आश्रित्य क्रमेण आविर्भवन्ति, तत्र सन्तानगतं यदेकत्वं तदेव सन्तानान्तःपातिषु क्षणिकेषु वस्तुषु उपचर्यते । अर्थक्रियासमर्थस्य परमार्थसतो नामान्तरं स्वलक्षणमिति शाक्यशास्त्रे प्रसिद्धम् । न हि सन्तानेन कोऽपि अर्थो दाहादिर्निष्पादयितुं शक्यते । अपि तु सन्तानान्तःपातीनि वस्तूनि एव दाहादिक्षमाणि । अतः सन्तानस्य नास्ति वस्तुत्वम् । तत्र किं नाम स्वलक्षणम् इति विचारयन्तो बौद्धाः शब्दस्यास्य व्युत्पत्तिम्

---

१. धर्मकीर्त्तिकृतन्यायविन्दुः, दुर्वेकमिश्रकृतधर्मोत्तर-रचितप्रदीपसहितन्यायविन्दुटीकासमेतश्च पत्राङ्कः – ७६

उपजीव्य तत्स्वरूपम् इत्थं व्याचक्षते – **'स्वम् असाधारणं लक्षणं तत्त्वं स्वलक्षणमि'**[२]ति । अर्थक्रियासाधनानि वस्तूनि सर्वस्वालक्षण्यरहितानि सर्वथा विशेषात्मकानि एव । अस्मादेव कारणाद् वस्तूनां शब्दवाच्यत्वं कथमपि न सम्भवति । शब्दो हि न्यूनतो वक्तृबोद्धव्ययोर्द्वयोः सामान्यतः अवगन्तव्यम् अर्थं प्रकाशयति । शब्दार्थेन न्यूनतो वक्तृबोद्धव्यसाधारणेन भवितव्यमिति निष्कृष्टार्थः । एतेन शब्दार्थस्य स्वरूपं सामान्यलक्षणमिति सिद्ध्यति । सामान्येन लक्षणं सामान्यलक्षणम्, साधारणं रूपमित्यर्थ इति धर्मोत्तरग्रन्थोऽत्रास्माकं शरणमस्तु । नास्ति विशेषात्मकानां वह्निस्वलक्षणानां किमपि साधारणं रूपम्, स्वरूपं वा । तथापि सकलासु क्षणिकासु वह्निव्यक्तियु साधारणं रूपं किञ्चिदारोप्यते, तदेव बौद्धैः सामान्यलक्षणमिति निर्दिश्यते । एतदेव सामान्यलक्षणं सकलवह्न्यादिषु समारोपितं साधारणं रूपं प्रस्थानान्तरेषु जातिरिति व्यपदिश्यते । मीमांसकमते जातिरेव शब्दस्य शक्यार्थः । नैयायिका अपि जातिविशिष्टव्यक्तिं शब्दार्थं मन्यमानाः, विशेषणतया अन्तर्भावयन्ति जातिं शक्यार्थे । परन्तु जातिः प्राभाकरमीमांसकमते न्यायवैशेषिकमते च व्यक्तितो व्यतिरिक्तं वस्त्वन्तरमेव । मीमांसकास्तु कौमारिला जातिव्यक्त्योर्भेदाभेदात्मकं तादात्म्यम् अभ्युपगच्छन्ति । प्राभाकरमते तु जातिर्व्यक्तितो व्यतिरिच्यत एव । बौद्धास्तु सामान्यस्य वस्तुत्वं पदार्थत्वं वा कथमपि नाङ्गीकुर्वन्ति । धर्मकीर्त्तिना प्रमाणवार्त्तिकस्य

---

**२. न्यायविन्दुटीका, पृष्ठाङ्कः – ७०**

स्वार्थानुमानपरिच्छेदे जातेः पदार्थत्वे बहवो दोषा उपदर्शिताः । एकमेव सामान्यं जात्यपरनामधेयं वह्नित्वं नानादेशवर्त्तिनीषु अतीतानागताविशेषेण भिन्नासु वह्निव्यक्तिषु अनुगतं वर्तते इत्याहुर्जातिवादिनः । सेयं जातिर्निष्क्रियेति नैयायिकानां सिद्धान्तः । एवं तर्हि अन्यवृत्तेर्भावस्य सामान्यस्य वह्नित्वस्य निष्क्रियत्वेन अविचलतो भिन्नदेशेन वस्तुना योगो न सम्भवतीति प्रथमो दोषः । पूर्वतः एव भिन्नदेशे वस्तुनि तत्सामान्यमासीदित्यपि न वक्तुं पार्यते । यद्धि अनागतं वस्तु तत्पूर्ववस्तुक्षणे नैवासीदिति आश्रयस्य तदानीम् अभावात् तत्र सामान्यस्य वृत्तिर्विरुद्ध्यते । उत्पन्ने भावान्तरे पूर्वभावगतं सामान्यं तत्र पश्चात् सम्बध्यत इत्यप्यसङ्गतम् । न हि सामान्यं घटत्वादिकं भवति सावयवं किञ्चन वस्तु येन तद् एकस्मिन् भावे अंशतो वर्तमानं सद् भावान्तरे भिन्नदेशे भिन्नकाले वा अंशतः सम्बध्येत । पूर्वं वस्तु परित्यज्य भिन्नदेशं नवागतं वस्त्वन्तरम् आश्रयति सामान्यम् इत्यपि न वक्तुं युक्तम् । एकमेव सामान्यं वह्नित्वं भिन्नदेशेषु भिन्नकालेषु चानेकवस्तुषु अनुवृत्तं वर्तत इति वदन्ति नैयायिकाः । सामान्यं पूर्वम् आधारं विहाय अन्यत् किमपि आधारान्तरं व्यक्त्यन्तरम् आश्रयन्ति – इति वक्तुं न क्षमन्ते केचित् । कथं तर्हि एकस्यैव सामान्यस्य एकस्मिन् भावे वर्तमानस्य भिन्नदेशेन भिन्नकालेन च भावान्तरेण सम्बन्ध उपपद्यत इत्येतत् सर्वं मनसि निधाय दोषपरम्परा सामान्यस्वीकारे कीर्त्तिना समुद्घाटिता ।

'न याति न च तत्रासीदस्ति पश्चान्न चांशवत् ।

जहाति पूर्वं नाधारमहो व्यसनसन्ततिः'[३] ॥

व्याख्यातञ्चैवं प्रमाणवार्त्तिकवचनम् – 'निष्क्रियत्वोपगमात् । न ह्यन्यवृत्तेर्भावस्य ततोऽविचलतो भिन्नदेशेन भावेन तदुभयान्तरालाऽव्यापिनो योगो युक्तः । प्राक् स न च तत्र तत्रोत्पन्नो न कुतश्चिदायात इति क इमं व्याखातभारमुद्वोढुं समर्थोऽन्यत्र जाड्यात् ? अपि च उत्पित्सुदेशाद् भिन्नदेशम् । तयोश्च वर्त्तत' इति । भिन्नदेशयोर्हि भावयोः सम्बन्धी द्विधा भवेत् । नानावयवात्मतयान्योन्यावयवाभ्यां तत्सम्बन्धादालोकरज्ज्वंशदण्डादिवत् । न हि सावयवत्वमन्तरेण भिन्नदेशाभ्यां युगपत् कस्यचिद् योगो युक्तस्तस्य द्वितीयात्माभावात्, एकात्मनश्च तत्प्रदेशवर्त्तिसम्बन्धरूपत्वात् । अन्यथा तत्सम्बन्धायोगाद् एकस्याधेयस्य तत्र स्थानं तत्र तदैव तेनैवात्मनाऽस्थानमिति तत्स्थिताऽस्थितात्मनोरेकस्य विरोधादयुक्तमेतत् ।

स्वलक्षणस्य शब्दवाच्यत्वाभावप्रसाधकं हेतुकतिपयम् अस्माभिः दर्शयितुं शक्यम् । वक्ता यदा भणति 'नीलम्' इति तदानीं स किमपि नीलस्वलक्षणं तच्छक्यार्थत्वेन परिगृह्णातीति यद्युच्यते, एवं तर्हि यः श्रोता तच्छब्दं श्रुत्वा अर्थं बुध्यते तस्य श्रवणक्षणे परभाविनि वक्त्रा विषयीकृतं स्वलक्षणं नावस्थातुं क्षमेत । सर्ववस्तूनां क्षणिकत्वस्य सौगतसम्मतत्वात् । तथा सति वक्तृबोद्धव्यसाधारणं स्वलक्षणं किमपि एकाधिकक्षणस्थायि

---

३. प्रमाणवार्त्तिकम्, स्वार्थानुमानपरिच्छेदः – १५२–१५३, पत्राङ्कः – २४६

प्राप्तुं न पार्यते । एतेन सामान्यलक्षणमेव शब्दार्थः । स्वलक्षणन्तु वस्त्वर्थभूतं सर्वथा क्षणिकम् असाधारणञ्च, एवं वस्त्वर्थस्य शब्दार्थत्वं शाक्यनये नोपपन्नम् । एवं स्थिते अवस्तुभूतं सामान्यलक्षणमेव किञ्चिच्छब्दार्थत्वमवगाहत इति सिद्धान्तः सौगतानाम् । प्राधान्येन असत्ख्यातिवादिनो हि बौद्धाः । तस्माद् अत्यन्ततोऽविद्यमानं शशविषाणादिकमपि शब्देन प्रकाश्यते । स असद्भूत एव शब्दार्थस्तैरभिधेयसत्तेति क्वचित् क्वचिद् व्यपदिश्यते । अभिधेयतयैव सत्ता, न तु वस्तुगत्या इत्यर्थः । प्रमाणवार्त्तिकस्य चतुर्थकारिकेयं प्रवर्तते –

**'वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते ।**

**प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम् ॥'**

एतेन वक्तृविवक्षितस्यार्थस्य विकल्पात्मकत्वमेव कीर्त्तितम् । अस्य श्लोकस्य व्याख्यानावसरे वार्त्तिकालङ्कारे प्रज्ञाकरगुप्तेन यदुक्तं तद्धि बौद्धार्थवादिनां पाणिनीयानां मतेन सविशेषं साम्यं विभर्त्ति । परस्परविरुद्धार्थप्रतिपादकेभ्यः शास्त्रेभ्यः अर्थावबोधः सञ्जायते, परन्तु तानि सर्वाणि विरुद्धार्थप्रतिपादकानि यथार्थानि भवितुं नार्हन्ति । Contradiction इति यद् विरोधनाम प्रचीच्यैर्हेतुविद्याविशारदैरुपदर्शितम्, तस्यैतत् स्वरूपं भूयः सन्दिष्टं यद् विरुद्धयोरेकस्य सत्यत्वम्, अपरस्य च मिथ्यात्वम् अवश्यं भवतः । (An Modern

elementory Logic, L.S. Stebbing) । एवं परस्परविरुद्धानां शास्त्रवाक्यानां सर्वेषां सत्यत्वम् असम्भवि । परन्तु असत्येभ्योऽपि शास्त्रवाक्येभ्यः अर्थबोधः समुदेति ।

परन्तु बौद्धमते नीलादिशब्दार्थो न केवलं विध्यात्मक एव । यथा विधिस्तथा इतरव्यावृत्तिरूपो निषेधोऽपि शब्दार्थत्वं घटयतः । हेत्वाभासस्थलेऽपि लभ्यते असद्भूतस्य बोधः । अतएव उच्यते शाक्यमते अतद्व्यावृत्तिः अन्यापोहो वा शब्दार्थः इति । व्यावृत्तिः अपोहो निषेधश्चेति पर्यायाः । अपपूर्वकाद् ऊह्-धातोर्घञ्प्रत्ययेन निष्पण्णः अपोहशब्दः व्यावृत्तिमाचष्टे । तत्र घञ्प्रत्ययः कर्मणि भवितुमर्हति । 'कृत्यल्युटो बहुलम्' इति अष्टाध्यायीसूत्रे बहुलग्रहणात् कृत्यादिभिन्ना अपि कृत्प्रत्यया अनियमितेषु अर्थेषु प्रवर्तन्त इति सिद्धं भवति । तत्रापि बहवः पक्षा दर्शयितुं शक्याः । अन्यस्माद् अपोह्यते इति अपोहः, अस्माद् वा अन्यद् अपोह्यते, अथवा अस्मिन् वा अन्यद् अपोह्यते इति त्रिधा व्युत्पत्तिः सम्भवति कर्मवाच्ये घञ्प्रत्ययस्वीकारस्थले । एवं सति विजातीयव्यावृत्तो बाह्य एव कोऽपि विषयः शब्दार्थः अथवा विजातीयव्यावृत्तबुद्ध्याकारः कोऽपि इत्यस्यां जिज्ञासायां बुद्ध्याकारस्यैव अभिधेयसत्तापरनाम्नः शब्दार्थत्वं बौद्धानामभिमतम् इत्यस्माभिः पूर्वमेव उपदर्शितम् । अथवा अपोहनम् अपोहः इति भावे 'घञ्'-प्रत्ययग्रहणाद् अन्यव्यावृत्तिमात्रम् अपोहः इत्यपि पक्षः सिद्ध्यति ।

तत्र प्रथमे पक्षद्वये निषिध्यमानस्य यद् अपोहत्वमुक्तं तद्धि 'अपोहनाम्ना विधेरेव विवक्षितत्वात्' – इति युक्तिबलेन प्रतिक्षिप्तम् । अन्तिमोऽपि पक्षो भावार्थप्रत्ययाश्रितो नोचितः । पर्वते वह्निरस्ति इत्युक्ते या प्रतीतिः समुदेति सा 'विधिरूपमेव उल्लिखन्ती' लक्ष्यते । एवंविधं पूर्वपक्षं प्रथमम् उपन्यस्य पश्चात् समाधानं कर्तुमीहन्ते रत्नकीर्त्ति-प्रभृतयोः बौद्धाः ।

गौरित्युक्ते विधिमुखेन कश्चन अर्थः अस्मदीयं बोधम् अनुपतत्येव । परन्तु कश्चिद् यदा गावं जानाति तदानीं तं यथा सास्नादिमत्त्वेन गृह्णाति तथा यत्किञ्चिद् गोः भिन्नं ततो व्यावृत्ततयापि । अत्रेदम् अस्माभिः स्मर्तव्यं यद् नैयायिकानुयायिनो वैशेषिका अपि कणादशिष्याः सत्तातिरिक्तानि द्रव्यत्वादीनि सर्वाणि सामान्यानि वस्तुगत्या सामान्यविशेषाख्यां लभन्त इति मन्यन्ते । द्रव्यत्वं यथा पृथिव्यादिषु नवसु द्रव्येषु वर्तमानं तेषु द्रव्यं द्रव्यमिति अनुगतप्रतीर्ति जनयति तथा अद्रव्येभ्यो विजातीयेभ्यो द्रव्यपदार्थं व्यावर्तयत्यपि । एवं सामान्यस्य वस्तुत्वम् अस्वीकुर्वाणा अपि सौगता विधिवद् व्यावृत्तिरपि शब्दार्थं रचयति इत्याहुः ।

शब्दार्थे विधेः प्राधान्यं निषेधस्य वा इत्ययं प्रश्नो बौद्धैर्महता यत्नेन समाहितः । शब्दार्थस्य विधिभावेन अर्थाद् अन्यनिषेध आक्षिप्यते । यदा हि कश्चिद् वदति वृक्ष इति, तदा अवृक्षनिवर्तनम् आक्षिप्तं भवति । अत्र विधिनिषेधयोर्मध्ये कोऽपि विशेष्यविशेषणभावः

परमार्थतः अस्तीति सिद्धान्तः प्रज्ञाकरगुप्तस्य । शब्दे तदन्यव्यावृत्तिः स्वार्थाभिधानञ्चेति व्यापारद्वयम् न परस्परभिन्नम् अवगन्तव्यम् । वस्तुतः स्वार्थस्य निषेधात्मकत्वात् स्वार्थाभिधानमेव तदन्यव्यावृत्तिप्रतीतिरिति मन्यते प्रज्ञाकरः । अव्यावृत्तिमतः अन्वयासम्भवात्, अनन्वयिनश्च व्यावृत्त्यसम्भवाद् द्वयोरत्यन्ताभेद एव प्रज्ञाकरस्याभिमतः ।

ज्ञानश्रीमित्रेण रत्नकीर्त्तिना च परवर्त्तिनि काले विधिपक्ष एव भराधानं कृतम् । विधेः विशेष्यत्वेऽपि तदन्यव्यावृत्तिर्विशेषणतया शब्दार्थे अवभासत इत्यभिप्रायस्तयो-राचार्ययोर्विशेष्यस्यैव प्राधान्यं विज्ञेयं विशेषणस्य च अप्राधान्यम् । रत्नकीर्त्तिना निबन्धावल्याम् पूर्वपक्षभूतं मतं किञ्चिद् इत्थं निराकृतम् । न हि विधिं प्रतिपद्य कश्चिदर्थापत्तितः पश्चादपोहमवगच्छति । अपोहं वा प्रतिपद्यान्यापोढम्[४] । एवं तर्हि प्राक्तनबौद्धमतात् तन्मतस्य कश्चिद् विशेषोऽस्माकम् अवधानमर्हति । वस्तुतस्तु गौरिति प्रतिपत्तिरेव अन्यापोढप्रतिपत्तिः । विशेष्यविशेषणयोः समकालत्वम् अवश्यम् अपेक्षितम् । अन्यथा तयोः सम्बन्ध एव न सम्भवति । तस्माद् अपोहधर्मस्य विधिरूपस्य शब्दादवगतिरिति सिद्धान्तः सौगतानां रत्नकीर्त्तिप्रमुखानाम् । यथा हि पुण्डरीकशब्दात् श्वेतिमविशिष्टं पद्ममवगम्यत एवं तदन्यव्यावृत्तिविशिष्टविधिरूपोऽपि शब्दार्थः । धर्मा हि धर्मिपरतन्त्रा इत्यस्ति लोकानुसिद्धिः । पूर्वं सूचितमस्माभिर्यद् वैशेषिकमतेऽपि द्रव्यत्वादीनां

---

४. रत्नकीर्तिकृतनिबन्धावली, पत्राङ्कः – ६८

जातीनां यथा अनुवर्तकत्वं तथा व्यावर्त्तकत्वमपि सिद्धम् । अतो हि द्रव्यत्वादीनां सामान्यविशेषः इति व्यपदेशः काणादनयप्रसिद्धः । द्रव्यत्वं यथा पृथिव्यादिषु परस्परभिन्नासु इदं द्रव्यम् इदं द्रव्यमित्यनुगताकारं ज्ञानं जनयति तथा – विजातीयेभ्यो गुणादिभ्योऽपि समानजातीयादि– द्रव्यत्वविशिष्टानि व्यावर्त्तयन्ति ।

सोऽयं सौगताभिमतः अपोहवादः कुमारिलादिभिः आस्तिकदार्शनिकैः महताडम्बरेण निराकृतः । तथा चायं श्लोकः सर्वयुक्तिसारभूतः श्लोकवार्त्तिके –

**'अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम् ।**

**गोत्वं वस्त्वेव तैरुक्तम् अगोऽपोह गिरा स्फुटम् ॥'**[५]

अयं हि श्लोकः सर्वासां विरुद्धयुक्तीनां श्लोकवार्त्तिक उक्तानां संक्षेपश्लोको भवितुम् अर्हतीति व्याख्याकारैः पार्थसारथिमिश्रादिभिः स्फुटम् अभिहितम् । पार्थसारथिना सौगतानाम् आशयः सविस्तरं प्रकाशं प्रापितः । शावलेयस्य गोः बाहुलेयेन गवा एतदेव साम्यं यद् उभयत्रैव अगोव्यावृत्तिः अनुगता वर्तते । व्यावृत्तिव्यतिरिक्तं न किमपि तत्र साम्यनिमित्तमस्ति । तथा चेमं प्रमाणवार्त्तिकश्लोकं समुद्धरति पार्थसारथिः–

**'यद् रूपं शावलेयस्य बाहुलेयस्य नास्ति तत् ।**

**अतत्कार्यपरावृत्तिर्द्वयोरपि च विद्यते'**[६] ॥

---

५. श्लोकवार्त्तिकम्, अपोहवादः, कारिका – १

अतो हि अतद्व्यावर्तन एव गोसदृशादेः संकेतः न स्वलक्षण इति सौगतसिद्धान्तो मनोरथनन्दिना प्रमाणवार्त्तिकवृत्तिकारेण स्पष्टमुपन्यस्तः ।

अपोहवादस्य समधिकं दौर्वल्यम् एतच्छ्लोकद्वारेणैव समुपस्थापितम्, अन्यैरपि बहुभिः शाक्यविरोधिभिरनुमोदितम् एतत् । यथा हि प्राभाकराः केवलभूतलं घटाभावं मन्यमाना कैवल्ये घटशून्यत्व एव घटाभावस्य अनुप्रवेशं घटयन्ति एवं अगोव्यावृत्तिं शब्दार्थं ब्रुवाणा बौद्धा अपि तत्रैव गवात्मकस्य वस्तुनः अनुप्रवेशं प्रकारान्तरेण अनुमन्यन्ते । अतो हि कुमारिलम् अनुसृत्य सिद्धान्तितं पार्थसारथिना यद् बौद्धैः अगोव्यावृत्तिं सामान्यं शब्दार्थम् अभिकाङ्क्षमाणैः गोत्वं वस्त्वेव शब्दान्तरेणाभिहितं, नार्थान्तरम् । शब्दान्तरेण प्रकारान्तरेण इत्यर्थः ।

भेदो हि व्यावृत्त्यपरनामधेयो निषेधात्मकः अभावाख्ये स्वतन्त्रपदार्थ एव अन्तर्भावित इति मतं नैयायिकानां नव्यानां वैशेषिकानाञ्च । अन्योन्याभाव इति नाम्ना भेदस्यैव तत्तद्ग्रन्थेषु परामर्शः । अभावनिरूपणन्तु प्रतियोगिनिरूपणाधीनमेव । अतो हि नैतच्चित्रं यत् सप्तपदार्थीकारो वैशेषिकः शिवादित्यमिश्रः प्रतियोगिज्ञानाधीनज्ञानतया अभावं लक्षयति । यस्य गोज्ञानं प्राक्तनं नासीत् तस्य गोनिषेधः अपि दुरधिगम एव । प्रतियोगिनो गोर्ज्ञानं गोभिन्नज्ञानार्थम् अपेक्षितम्, तथा गोभिन्नभिन्नत्वस्य गोवृत्तित्वं भवति । यो न

---

६. प्रमाणवार्त्तिकम्, स्वार्थानुमानम्, सामान्यविचारः, कारिका – १३९–१४०

जानाति को नाम गौरिति स गोभिन्न इत्युक्तेर्न किमपि अवगच्छति । गोभिन्नत्वावगमाभावे गोभिन्नभिन्नत्वज्ञानमपि सर्वथा दुरासदम् ।

अयं हि विस्तरः – भेदस्य निरूपणं प्रतियोगिनिरूपणं व्यतिरिच्य न सम्भवति । एवं गोभिन्नभिन्नत्वप्रतीतिर्गोभिन्नत्वज्ञानमपेक्षते, एवं गोभिन्नत्वज्ञानमपि गोत्वज्ञानम् । तथा स्थिते गोत्वमपहाय गोभिन्नभिन्नत्वस्य ज्ञानं सर्वथा असम्भवि इत्येवं शब्दार्थे वस्तुभूतस्य गोत्वादेर्विध्यात्मकस्य अनुप्रवेशो दुष्परिहरः अपोहवादिभिरपि । तत्रेदं समाधानं कर्तुं शक्यं शब्दप्रयोगस्य (Weakness or limitation of language) । वस्तुगत्या इदं दौर्बल्यं यद् गोशब्दं विहाय अगोव्यावृत्तत्वं वर्णयितुमशक्यमिति । दृश्यते च न्यायशास्त्रेऽपि कम्बुग्रीवादिमत् पदार्थमनुल्लिख्यघटो घटपदशक्य इत्येवम् अर्थविश्लेषणम् ।

वस्तुतस्तु सौत्रान्तिकसम्मतं वाह्यार्थवादं कथञ्चिद् उपाश्रित्य रत्नकीर्त्तिना अत्र समाधानाय प्रयतितम् । न्यायविन्दुटीकाकारेण धर्मोत्तरेण शब्दार्थत्वेन बाह्यार्थस्य आरोपितत्वं यद् उक्तं तद् रत्नकीर्त्तिना प्रत्यादिष्टम् इति प्रतिभाति । रत्नकीर्त्तिमते यथा बाह्योऽर्थस्तथा बुद्ध्याकार इति द्वयमेव शब्दार्थकोटि प्रविष्टम् । यथाह सः 'तदेवं विधिरेव शब्दार्थः । स च बाह्योऽर्थो बुद्ध्याकारश्च विवक्षितः'[७] ।

---

७. न्यायविन्दुः, रत्नकीर्त्तिटीकाः, पत्राङ्कः – ७६

अतद्व्यावृत्तिः शब्दार्थः इति सौगतसिद्धान्तः अपरान् अपि विविधान् बौद्धसिद्धान्तान् उपकरोति । अत्रैकं दृष्टान्तम् अस्माभिरुपस्थाप्यते । बौद्धमते तादात्म्यं तदुत्पत्तिर्वा स्वभावप्रतिबन्धस्य व्याप्त्याख्यस्य मूलम् । तथा चेयं सुप्रसिद्धा प्रामाणवार्त्तिककारिका –

**'कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।**

**अविनाभावनियमोऽदर्शनान्न न दर्शनात्'[८] ॥**

स्वभावशब्देन अत्र साध्यात्मनः साध्यस्वभावस्यैव हेतोरुल्लेखः । तेन तादात्म्यमेव उक्तं भवति । स्वभावाद् तादात्म्याद् वा इति व्याचष्टे मनोरथनन्दी । तद्धि तादात्म्यं साधनस्य साध्याव्यभिचारित्वनियमं व्यवस्थापयति । यत् कृतकं तद् अनित्यम् इत्यत्र कृतकत्वम् अनित्यत्वेन अभिन्नं, तन्न व्यभिचरति । अत्र पूर्वपक्षिभिः चोद्यते यदि कृतकत्वस्य अनित्यत्वेन अभेद एवं तर्हि द्वयोरुद्देश्यविधेययोः पृथगुल्लेखः पुनरुक्तिदोषदुष्टः कथं सङ्गच्छत इति । तत्र वस्तुनः अभेदेऽपि शब्दद्वयस्य प्रवृत्तिनिमित्तगतो भेद एव पृथगुल्लेखं सुगमीकरोति । प्रवृत्तिनिमित्तञ्च शब्दस्य बौद्धमते अतद्व्यावृत्तिमेव प्राधान्येन विषयीकरोति । शब्दः अनित्यः कृतकत्वाद् – इत्यत्र कृतकत्वशब्देन अकृतकव्यावृत्तिः प्रकाश्यते, एवम् अनित्यशब्देनापि अनित्यभिन्नभिन्नत्वम् । एवं निषेधमुखेन

---

**८. प्रमाणवार्त्तिकम्, स्वार्थानुमानपरिच्छेदः, व्याप्तिविचारः, कारिका – ३१**

प्रवृत्तिनिमित्तगतभेदस्य दर्शयितुं शक्यत्वात् यत्कृतकं तद् अनित्यम् इत्यादि वाक्ये उद्देश्यविधेयभावः सिध्यति, सिध्यति च अनित्यत्वकृतकत्वयोः गम्यगमकभावः । एतद्धि दृष्टान्तमस्माभिः प्रदर्शितम् बौद्धसम्मतम् अपोहवादं द्रढयति । प्रतीच्येन दार्शनिकेन Frege इत्याख्येन 'Sense' इत्यस्य अर्थापरनाम्नः (Meaning) Referent इत्यस्माद् वस्तुभूताद् वैलक्षण्यं यत्प्रतिपादितं, यच्च पाणिनीयैः शब्दस्य बौद्धार्थत्वम् एव समुद्घोषितम् । तत्तन्मतेन बौद्धमतस्य किञ्चित् साम्यसत्त्वेऽपि शब्दार्थे अतद्व्यावृत्तेरनुप्रवेशः सौगताभिप्रायस्य अभिनवत्वमेव सूचयति ।

उपसंहारे तावदस्माभिरेवमुच्यते यन्निषेधमात्रं व्यावृत्तिमात्रं शब्दार्थ उत विधिमात्रमित्यत्रास्ति वैमत्यं निःसंशयं सौगतानाम् । प्रज्ञाकरगुप्ताद् आरभ्य ते विधिमपि शब्दार्थे अन्तर्भावयितुमीहन्ते । तयोरन्यतरेणापरस्याक्षेप इति तन्मतमपि न सहन्ते ज्ञानश्रीमित्रादयः । विधिः प्रथममेवावरोहति प्रतीतिम्, अतद्व्यावृत्तिरपि तदानीमेवानुपतति प्रतीतिपथमिति ब्रुवाणा ज्ञानश्रीमित्ररत्नकीर्त्यादयो लोकाविरुद्धं मतं किञ्चित् पुष्णन्ति । तथापि स्वलक्षणस्य परमार्थसतः शब्दावाच्यत्वमधिकृत्य सर्वेषां सौगतानामविप्रतिपत्तिरेव प्रायेण चकास्ति । शब्दाद्वैतिभिर्यदुक्तं शब्दार्थस्य बौद्धत्वमिति सम्मतिस्तत्र प्रदर्शिता योगाचारैरप्यसत्ख्यातिपक्षपातिभिः । युक्तयोऽपि कात्स्नेनोभयपक्षोपस्थापिता ऐक्यरूप्यमवगाहन्त इति नास्तिकास्तिकयोरविसंवादः सुतरां विस्मयावहः ।

सौगतमते सामान्यलक्षणमेव व्यावृत्तिमुखेन शब्दवाच्यम् । परमार्थसत् स्वलक्षणन्तु सर्वमालक्षण्यविनिर्मुक्तं केनापि शब्देन नाभिधातुं शक्यम् । अतएवाभिधेयं – सत्तैव तन्मते शब्दप्रकाशा न वस्तुसत्ता । नैयायिकानां नये घटानाम् अनुगतधर्मस्तावद् घटत्वम् । सर्वेषु घटेषु विद्यमानं घटत्वम्, घटेतरेभ्यो घटस्य भेदं सूचयति । बौद्धप्रस्थानस्य आचार्या अपि सर्वेषु पदार्थेषु विद्यमानस्य अनुगतधर्मस्य अन्वेषणं कृतवन्तः । एवम्प्रकारम् अन्वेषणं विधाय तैरतद्व्यावृत्तेः सन्धानं लब्धम् । का तावद् अतद्व्यावृत्तिः ? तस्मात् पदार्थाद् भिन्नः, अतद् । तस्माद् व्यावृत्तिर्निषेधः । घटाद् इतरः, घटेतरः, घटभिन्नः, घटभिन्नस्य निषेधः अर्थाद् घटेतरेभ्यो निषेधो घटशब्दस्य अर्थ इति बौद्धानां मतम् । न्यायनये शब्दस्य अर्थो भावरूपः (Positive Concept) । बौद्धानां नये शब्दार्थस्तावद् अभावरूपः (Negative Concept) । यदि शब्दार्थस्य अभावरूपत्वम् अङ्गीक्रियते तर्हि सत्तावतः कस्यचिद्वस्तुनः प्रतीत्यर्थम् अन्यस्य कस्यापि शब्दस्य आवश्यकता स्यात् । परन्तु बौद्धप्रस्थाने तस्य अङ्गीकारो न कृतः इत्यत्रैव बौद्धप्रस्थानस्य दौर्बल्यम् ।

बौद्धमते स्वलक्षण-सामान्यलक्षणभेदेन विषयद्वयं स्वीक्रियते । एवञ्च प्रत्यक्षम् अनुमानञ्चेति प्रमाणद्वयमेव अभ्युपेयते । नामजात्यादियोजनारहितो वस्तुनो निष्प्रकारकः स्वरूपमात्र एव स्वलक्षणस्वरूपो भवति । तस्यैव प्रत्यक्षेण ग्रहणं जायते, न

त्वनुमानप्रमाणेनेति बौद्धा मन्यन्ते । बौद्धमते वस्तूनां स्वरूपमात्रावगाहि ज्ञानं स्वीक्रियते । विशिष्टविषयकज्ञानन्तु अप्रमेति ते मन्यन्ते । शाब्दबोधस्यैकार्थे अपरार्थस्य अन्वयबोधात्मकतया बौद्धमते अप्रामाण्यमेव अभ्युपेयते । यद्यपि बौद्धाः शब्दप्रमाणं नाङ्गीकुर्वन्ति – इति सत्यम्, तथापि आकाङ्क्षादिमच्छब्दश्रवणानन्तरं ततः बोधस्तेषां जायत इति ते स्वीकुर्वन्त्येव । किन्त्वसौ बोधस्तन्मते प्रमा न भवतीति । भ्रम एव भवति । सम्बन्धविषयकतया कल्पितत्वेन शाब्दबोधस्य भ्रमत्वम् एव भवति । कल्पनापोढम् अभ्रान्तम् इति तन्मतम् । नामजात्यादियोजनैव कल्पना (कल्पनाविषय इति यावत्) । अतएव तथाविधो यथा 'गौरस्ति' इति वाक्यश्रवणानन्तरम् अनुमानप्रमाणेनैव 'अस्तितावान् गौः' ईदृशो बोधस्तन्मते स्वीक्रियत इत्येव मन्तव्यम् । तथा च 'गौरस्ति' इति श्रवणानन्तरं स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षावत् पदस्मारितत्वहेतुना गवि अस्तित्वस्य अनुमितिरभ्युपेयते बौद्धैरिति । एवं क्रमेणैव ते अन्यविधवाक्येभ्यः अनुमित्यात्मकबोधम् अभ्युपयन्ति । यतो हि ते तदभिमतद्विविधप्रमाणाभ्यां प्रमाणान्तरं न स्वीकुर्वन्ति । तस्माच्छब्दतो वैशेषिकवद् अनुमितार्थज्ञानम् (अनुमितिः) तैः स्वीकरणीयम् । उक्तविधशब्दानुमितिरूपज्ञानस्य अयथार्थत्वेऽपि ततः अभिलषितवस्तु प्राप्त्या प्रवृत्तेः साफल्यम् उपजायते तेनैव तादृशज्ञानस्य भ्रमत्वेऽपि प्रयोजनीयता बौद्धैरभ्युपेयत इति । शब्दश्रवणानन्तरम् एकार्थे अपरार्थस्य बोधः स्मृतिरूप एव भवति । स एव बौद्धैराद्रियत

इति तु वक्तुं न शक्यते । यतो हि शब्दजन्यतादृशानुमितेः संस्काराजन्यत्वेन स्मृतित्वं कल्पयितुं न शक्यत इति । तथा च गौरस्ति इति वाक्यश्रवणानन्तरम् 'अस्तितावान् गौः' इत्याकारकसंस्कारस्य अभावाद् एतादृशज्ञानस्य संस्कारप्रभवत्वं नास्ति । तस्मात् तज्ज्ञानस्य स्मृतित्वमपि कल्पयितुं न शक्यत इति । यतो हि बौद्धैः शब्दप्रमाणं न स्वीक्रियते तत एव शाब्दबोधस्तेषाम् अनभिमत इति ज्ञातव्यः । किन्तु बौद्धाचार्यैः स्वकीयानुभूतिं लोकेषु बोधयितुं पुस्तकानि विरच्यन्ते । एवञ्च पुस्तकं दृष्ट्वैव ज्ञानं लभ्यते बौद्धैः । अतएव शब्दश्रवणानन्तरं मा भवतु शाब्दबोधम्, किन्तु प्रत्यक्षविलक्षणं ज्ञानमेकम् उपजायत इति तु बौद्धाः मन्यन्त इति । यदि च शब्देभ्यो ज्ञानमेव न स्याद् इत्येव मन्यते तदा स्वबोधस्य परेषु संक्रान्तये वाक्यानां प्रयोग एव न स्याद् इति । तर्हि कथं बौद्धैर्वाक्यानि प्रयुज्यन्त इति चिन्तनीयम् ।

बौद्धमते सर्वेषां वस्तूनां क्षणिकत्वेन पदजन्यप्रतीयमानार्थानामपि क्षणिकतया एकपदार्थे पदार्थान्तरस्य सम्बन्धो भवितुं नार्हेत् । तथा सति सम्बन्धविषयकार्थबोधो वाक्येभ्यो नोपजायेत इति मन्यते तदा 'नीलो घटः' इत्यादिवाक्येभ्यो नीलादिपदोपस्थाप्य नीलाद्यर्थस्य च उपस्थितिमात्रम् । अर्थात् पदार्थोपस्थितिमात्रं भवतीति विज्ञेयम् ।